# ॥ सिंह पञ्चकम् ॥

ग्रीवायां मधुसूदनोऽस्य शिरसि श्रीनीलकण्ठः स्थितः

श्रीदेवी गिरिजा ललाटफलके वक्षःस्थले शारदा ।

षड्वक्त्रो मणिबन्धसन्धिषु तथा नागास्तु पार्श्वस्थिताः

कर्णौ यस्य तु चाश्विनौ स भगवान् सिंहो ममास्त्विष्टदः ॥ १ ॥

यन्नेत्रे शशिभास्करौ वसुकुलं दन्तेषु यस्य स्थितं

जिह्वायां वरुणस्तु हुंकृतिरियं श्रीचर्चिका चण्डिका ।

गण्डौ यक्षयमौ तथोष्ठयुगळं सन्ध्याद्वयं पृष्टके

वज्री यस्य विराजते सुभगवान् सिंहो ममास्त्विष्टदः ॥ २ ॥

ग्रीवासन्धिषु सप्तविंशतिमितान्यृक्षाणि सन्ध्या हृदि

प्रौढानि घृणता तमोऽस्य तु महाक्रौर्ये समाः पूतनाः ।

प्राणो यस्य तु मातरः पितृकुलं यस्यास्त्यपानात्मकं

रूपे श्रीकमला कचेषु विमलास्तेस्यूरवे रश्मयः ॥ ३ ॥

मेरूस्याद्वृषणोऽन्धयस्तु जनने स्वेदस्थिता निम्नगा

लाङ्गूले सहदैवतैर्विलसिता वेदा बलं वीर्यकम्।

श्रीविष्णोः सकला करा अपि यथा स्थानं स्थिता यस्य तु

श्रीसिंहोऽखिलदेवतामयवपुः देवीप्रियः पातु माम्॥ ४॥

यो बालग्रहपूतनादिभयहृत् यः पुत्रलक्ष्मीप्रदो

यो स्वप्नज्वररोगराजभयहृद्यो मङ्गले मङ्गलः।

सर्वत्रोत्तमवर्णनेषु कविभिर्यस्योपमा दीयते

देव्या वाहनमेष रोगभयहृत् सिंहो ममास्त्विष्टदः॥ ५॥

*[ सिंहद्वादशाक्षरीं जप्त्वा ततः कृताञ्जलिः स्तूयात् ]*

॥ इति उड्डामरेश्वरतन्त्रोक्तं सिंह-पञ्चकम्॥

|| siṁha pañcakam ||

grīvāyāṁ madhusūdano'sya śirasi śrīnīlakaṇṭhaḥ sthitaḥ

śrīdevī girijā lalāṭaphalake vakṣaḥsthale śāradā |

ṣaḍvaktro maṇibandhasandhiṣu tathā nāgāstu pārśvasthitāḥ

karṇau yasya tu cāśvinau sa bhagavān siṁho mamāstviṣṭadaḥ || 1 ||

yannetre śaśibhāskarau vasukulaṁ danteṣu yasya sthitaṁ

jihvāyāṁ varuṇastu huṅkṛtiriyaṁ śrīcarcikā caṇḍikā |

gaṇḍau yakṣayamau tathoṣṭhayugaḻaṁ sandhyādvayaṁ pṛṣṭake

vajrī yasya virājate subhagavān siṁho mamāstviṣṭadaḥ || 2 ||

grīvāsandhiṣu saptaviṁśatimitānyṛkṣāṇi sandhyā hṛdi

prauḍhāni ghṛṇatā tamo'sya tu mahākraurye samāḥ pūtanāḥ |

prāṇo yasya tu mātaraḥ pitṛkulaṁ yasyāstyapānātmakaṁ

rūpe śrīkamalā kaceṣu vimalāstesyūrave raśmayaḥ || 3 ||

merūsyādvṛṣaṇo'ndhayastu janane svedasthitā nimnagā

lāṅgūle sahadaivatairvilasitā vedā balaṁ vīryakam |

śrīviṣṇoḥ sakalā karā api yathā sthānaṁ sthitā yasya tu

śrīsiṁho'khiladevatāmayavapuḥ devīpriyaḥ pātu mām || 4 ||

yo bālagrahapūtanādibhayahṛt yaḥ putralakṣmīprado

yo svapnajvararogarājabhayahṛdyo maṅgale maṅgalaḥ |

sarvatrottamavarṇaneṣu kavibhiryasyopamā dīyate

devyā vāhanameṣa rogabhayahṛt siṁho mamāstviṣṭadaḥ || 5 ||

*[siṁhadvādaśākṣarīṁ japtvā tataḥ kṛtāñjaliḥ stūyāt]*

|| iti uḍḍāmareśvaratantroktaṁ siṁha-pañcakam ||

www.kamakotimandali.com